नं राज्ञा निवर्त्तनीय इत्याह मनुः।
"यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात्।
स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन् धनम्"॥*॥
धनवता ऋणिकेनादत्ते ऋणे राजा स्वयं विंशतितमभागं गृहीत्वा उत्तमर्णाय दापयेत् इत्याह नारदः॥
"ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति।
राज्ञा दापयितव्यः स्याद्गृहीत्वांशन्तु विंशकम्"॥*॥
यदा अधमर्णिकः सकलमृणं दातुमसमर्थः शक्त्यनुसारेण दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेत् एतावद्दत्तं उत्तमर्णेन उपगतं प्राप्तमिति धनी तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेत् इत्याह याज्ञवल्क्यः।
"लेख्यस्य पृष्ठेऽभिलिखेत् दत्त्वा दत्त्वाधनं ऋणी।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम्"॥
इति विवादार्णवसेतुः॥

ऋत, गत्याम्। स्पर्द्धने। ऐश्वर्य्ये। घृणायाम्। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-ईयङ्पक्षे आत्मं-गत्यर्थे सकं, अन्यार्थे-अकं-सेट्।) घृणा दया। ऋतीयते जनः स्पर्द्धते ईश्वरो भवति। किञ्चिद्यते गच्छति वेत्यर्थः। अरे तु ईयङोऽप्राप्तिपक्षे परस्मैपदमेव। आर्त्तीत् आनर्त्त इत्यादि। इति दुर्गादासः।

ऋतं, क्ली, (ऋ + क्त।) उञ्छशिलम्। (यथा, मनुः। ४। ४—५॥
"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्"॥)
जलम्। (यथा, ऋग्वेदे। ७। १०१। ६। "तन्म ऋतं पातु शतशारदाय"। "ऋतमुदकम्"। इति भाष्यम्॥) सत्यं इति मेदिनी॥ (यथा, मनुः। ८। ८२।
"साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्भृशम्।
"विवशः शतमाजातीस्तस्मात् साक्ष्यं वदेदृतम्"॥
कर्म्मफलं। यथा, "ऋतं पिबन्तौ सुकृतस्य लोके"। इति श्रुतिः॥ विष्णुः॥ यथा, महाभारते। १। १। २५२।
"भगवान् वासुदेवश्च कीर्त्त्यतेऽत्र सनातनः।
स हि सत्यमृतञ्चैव पवित्रं पुण्यमेव च।
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्"॥
पुं, सूर्य्यः। यथा, शतपथब्राह्मणे। "ब्रह्म वा ऋतं ब्रह्म हि मित्रो ब्रह्म ऋतं ब्रह्म एवायुः"॥ परब्रह्म। यथा, श्रुतिः। "ऋतमेकाक्षरं ब्रह्म"॥ सत्याचारः। यथा, ऋग्वेदे। १। १३७। २। "सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये"॥ "ऋताय सत्याचाराय"। इति दयानन्दभाष्यम्॥ रुद्रः। यथा, सामगानां सन्ध्यामन्त्रे रुद्रोपस्थाने। "ऋतमित्यस्य कालाग्नी रुद्र ऋषिरनुष्टुप्छन्दो रुद्रो देवता रुद्रोपस्थाने विनियोगः"॥ देवभेदः। यथा, ऋग्वेदे। ४। २३। ८। "ऋतस्य हि शुरुधः सन्ति पूर्व्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति"। "ऋतस्य ऋतदेवस्य"। इति भाष्यम्॥ यज्ञः। यथा, ऋग्वेदे। १। १४५। ५। "ऋतचिद्धि सत्यम्"। "ऋतस्य यज्ञस्य जलस्य वा चित् ज्ञाता"। इति भाष्यम्॥ अग्नेर्ऋषिभेदः। यथा, यजुषि। १७। ८२। "ऋतश्च सत्यश्च"। इति॥)

ऋतः, त्रि, (ऋ + क्त।) दीप्तः। पूजितः। इति मेदिनी॥

ऋतजित्, पुं, (ऋतं जयति ऋत + जि + क्विप्।) यक्षविशेषः। यथा,—
"त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः॥
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे।
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये"॥
इति श्रीविष्णुपुराणे २। १०। १५—१६। "त्वष्टा सूर्य्यः। कम्बलः सर्पः। ब्रह्मापेतो राक्षसः। ऋतजिद्यक्षः। धृतराष्ट्रो गन्धर्व्वः। इति तट्टीकायां श्रीधरस्वामी॥ (त्रि, यज्ञजेता। यथा, यजुषि १७। ८३। "ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च"॥)

ऋतधामा, [न्] पुं, (ऋतं सत्यं धाम भवनं यस्य।) विष्णुः। इति त्रिकाण्डशेषः॥ (यथा यजुर्व्वेदे ५। ३२। "हव्यसूदन ऋतधामासि स्वर्ज्योतिः"॥ इन्द्रभेदः। स तु रुद्रसावर्णिके मनौ भविता। यथा,— भागवते। ८। १३। २८।
"भविता रुद्रसावर्णी राजन्! द्वादशमो मनुः।
ऋतधामा च देवेन्द्रो देवाश्च हरितादयः"॥
यदुवंशीयो नृपतिभेदः। यथा, भागवते।
"कङ्कस्य कर्णिकायां वै ऋतधामाजयावपि"॥
अविनश्वरस्थानवति, त्रि। यथा यजुर्व्वेदे। १८। ३८।
"ऋताषाडृतधामाग्निर्गन्धर्व्वस्तस्यौषधयः"॥)

ऋतिः, स्त्री, (ऋ + करणे + क्तिन्।) कल्याणम्। वर्त्म। जुगुप्सा। स्पर्द्धा। इति मेदिनी॥ (भावे + क्तिन्।) गमनम्। अशुभम्। इति धरणी॥ (पुरुषमेधयज्ञीयदेवभेदः। यथा, यजुर्व्वेदे। ३०। १३। "ऋतये स्तेन हृदयम्"। शत्रौ पुं, इति निरुक्तिः।)

ऋतीया, स्त्री, (ऋत + ईयङ् + टाप्।) घृणार्थकः। जुगुप्सा। तत्पर्य्यायः। आर्त्तनम् २ ऋणीया ३। इत्यमरः॥

ऋतुः, पुं, (ऋ + "अर्त्तेश्च तुः"। इति उणादिसूत्रेण १। ७२। तुः चकारात् कित् च।) कालविशेषः। स तु षड्विधः यथा। मार्गपौषौ हिमः १ माघफाल्गुनौ शिशिरः २ चैत्रवैशाखौ वसन्तः ३ ज्यैष्ठाषाढौ ग्रीष्मः ४ श्रावणभाद्रौ वर्षाः ५ आश्विनकार्त्तिकौ शरत् ६। इत्यमरः॥ स त्रिविधोऽपि। कार्त्तिकाग्रहायणपौषमाघाः शीतः १ फाल्गुनचैत्रवैशाखज्यैष्ठाः ग्रीष्मः २ आषाढश्रावणभाद्राश्विनाः वर्षाः ३। द्विविधोऽपि। कार्त्तिकादिषण्मासाः शीतः १ वैशाखादिषण्मासाः ग्रीष्मः २। इति स्मृतिः॥ * ॥
(यदुक्तम्।
"मासद्वयात्मकः कालः ऋतुः प्रोक्तो विचक्षणैः"।
यत्र तु "द्वादश मासाः पञ्चर्त्तवः" इति श्रुतं तत्र हेमन्तशिशिरयोरेकत्रीकरणं विवक्षितम्॥
"चयकोपशमा यस्मिन् दोषाणां सम्भवन्ति हि।
ऋतुषट्कं तदाख्यातं रवेः राशिषु संक्रमात्॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृड्मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्॥
धनुर्ग्राहौ च हेमन्तौ वसन्तः कुम्भमीनयोः"।
मेषवृषौ रविणा संक्रान्तौ। एवं मिथुनकर्कटाविल्यादि। अन्ये तु।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्धिमाः।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"वर्षाः शरच्च हेमन्तः शिशिरश्च वसन्तकः।
ग्रीष्मश्चेति क्रमादेते ऋतवः षट् प्रकीर्त्तिताः॥
पृथक् पृथक् प्रवक्ष्यामि रवेर्गतिविशेषतः"।
इति प्रथमस्थाने चतुर्थेऽध्याये हारीतेनोक्तम्॥
"मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षडृतवः स्मृताः।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षा शरद्धिमाः"॥
इति सूत्रस्थाने तृतीयेऽध्याये वाभटेनोक्तम्॥
"इह खलु संवत्सरं षडङ्गमृतुविभागेन विद्यात्"।
इति सूत्रस्थाने षष्ठोऽध्यायः।
"तत्र खलु तावत् षोढ़ा प्रविभज्य कार्य्यमुपदेक्ष्यते। हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रयः ऋतवो भवन्ति। तेषामन्तरेष्वितरे साधारणलक्षणास्त्रय ऋतवः प्रावट्शरद्वसन्ता इति। प्रावृड़िति प्रथमः प्रवृष्टेः कालस्तस्यानुबन्धो वर्षाः। एवमेते संशोधनमधिकृत्य षड् विभज्यन्ते ऋतवः"।
इति च विमानस्थानेऽष्टमेऽध्याये चरकेणोक्तम्।
"तत्र माघादयो द्वादशमासा द्विमासिकमृतुं कृत्वा षडृतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः। मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षाः। इषोर्जौ शरत्। सहःसहस्यौ हेमन्त इति॥ तत्र ते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च"।
"इह तु वर्षा-शरद्धेमन्त-वसन्त-ग्रीष्म-प्रावृषः षडृतवो भवन्ति दोषोपचय-प्रकोपोपशम-निमित्तम्। ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्यथा। भाद्रपदाश्वयुजौ वर्षाः। कार्त्तिकमार्गशीर्षौ शरत्। पौषमाघौ हेमन्तः। फाल्गुन-चैत्रौ वसन्तः। वैशाख-ज्यैष्ठौ ग्रीष्मः। आषाढ़-श्रावणौ प्रावृड़िति"। इति सूत्रस्थाने ६ अध्याये सुश्रुतेनोक्तम्॥)
स्त्रीकुसुमम्। इति विश्वमेदिन्यौ॥ तत्पर्य्यायः। रजः १ पुष्पम् २ आर्त्तवम् ३। इत्यमरः॥
यथाह मनुः। ३। ४५-४९।
"ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा।
पर्व्ववर्ज्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया॥
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः।
चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः॥
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या।